# Master of Arts Examination, 2022

(2nd Year, 4th Semester)

## SANSKRIT

## Course – XVI/E

## [Select Post Aśokan (Pre-Gupta) and Gupta Inscriptions]

Time : Two hours　　　　Full Marks : 30

*The figures in the margin indicate full marks.*

१। अधोलिखितेषु प्रश्नेषु **पञ्च** सुरगिरा देवनागरीलिप्या समाधेयाः। 1×5=5

क) समुद्रगुप्तस्य एलाहाबादस्तम्भलेखे हरिषेणस्य परिचयः केन प्रकारेण प्राप्यते?

ख) प्रणयक्रिया का?

ग) वासिष्ठीपुत्रपुलुमाविना को ग्रामो दत्तः? स ग्रामः कुत्रावस्थितः?

घ) १२४-गुप्ताब्दे प्रचारिते दामोदरपुरताम्रशासने 'अप्रहत' इति पदस्य कोऽर्थः? कोटिवर्षविषयस्य अधुनातनस्थितिः निर्दिश्यताम्।

ङ) पट्टवायश्रेण्याः मान्दासोराभिलेखानुसारं कस्यां तिथौ भास्करस्य प्रासादो निवेशितः? लेखस्यास्य कविः कः?

च) एलाहाबादस्तम्भे समुद्रगुप्तस्य लेखं वर्जयित्वा अपरे के लेखाः विद्यन्ते?

छ) स्कन्दगुप्तस्य जुनागडलेखानुसारं चक्रपालितस्य गुणचतुष्टयमुल्लिख्यताम्।

[ Turn over



२। अधोलिखितेषु प्रश्नेषु **पञ्च** समाधेयाः। 5×5=25

क) १२४-गुप्ताब्दे १२६-गुप्ताब्दे च प्रचारितं दामोदरपुरताम्रशासनद्वयमाश्रित्य तदानीन्तनभूमिस्वत्वान्तविधिरालोच्यताम्। तस्मिन् कार्ये प्रशासनस्य कीदृशी भूमिका आसीत्? धर्मानुशंसनश्लोकाः के? 2+2+1

ख) वासिष्ठीपुत्रपुलुमावेः ऊनविंशराज्यवर्षाङ्कितनासिकलेखमाश्रित्य गौतमीपुत्रसातकर्णेः कीर्तयो वर्णनीयाः। 5

ग) मेहरौलिस्तम्भलेखस्य चन्द्रराजस्य परिचयविषये श्रद्धेयतमं तत्त्वमुल्लिख्यताम्। समासतो वाह्लिकानां परिचयः प्रदेयः। $3\frac{1}{2}+1\frac{1}{2}$

घ) समुद्रगुप्तस्य एलाहाबादस्तम्भलेखानुसारं समुद्रगुप्तेन दक्षिणापथस्य के राजानः केन प्रकारेण विजिताः? तेषां संक्षिप्तः परिचयः प्रदेयः। 2+3

ङ) प्रथमरुद्रदाम्नो जुनागडलेखानुसारं कस्यां तिथौ कथं सुदर्शनसेतुः भग्नो जातः? सुदर्शनसेतोः कीदृशं इतिवृत्तमुपलभ्यते लेखादस्मात्? तस्य संस्कारार्थं रुद्रदाम्ना कीदृश उद्योगः कृतः? 2+1+2

च) पट्टवायश्रेण्याः मान्दासोराभिलेखमाश्रित्य तेषामभिवासनस्य तथा वृत्तिपरिवर्तनस्य च संभाव्यकारणानि आलोच्यन्ताम्। $2\frac{1}{2}+2\frac{1}{2}$

छ) सप्रसङ्गं व्याख्या कार्या।

- मिथो हि पूर्वापररात्रमुत्थिता विचिन्तयां चापि बभूवुरुत्सुकाः।
- दक्षिणापथपतेः सातकर्णेर्द्विरपि निर्व्याजमवजित्यावजित्य।